National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(67): 179-183
© 2026 NJHSR
www.sanskritarticle.com

**Ganesh Acharya**
Department of Education,
National Sanskrit University,
Tirupati

**Correspondence:**
**Ganesh Acharya**
Department of Education,
National Sanskrit University,
Tirupati

# चिकित्साविज्ञाने संज्ञानस्य महत्त्वम्

**(The Importance of Cognition in Medical Science)**

**Ganesh Acharya**

**❖ सारांशः - (Abstract)**

संज्ञानं मनुष्यस्य ताः मानसिकप्रक्रियाः सन्ति, याभिः सः सूचनाः प्राप्नोति, अवगच्छति, संसाधयति, धारयति, पुनःस्मरति तथा यथावश्यकं तासां प्रयोगं करोति। अवधानम्, प्रत्यक्षीकरणम्, स्मृतिः, अधिगमः, भाषा, तर्कः, समस्यासमाधानम्, निर्णयः तथा कार्यकारीक्षमता इत्यादयः संज्ञानस्य प्रमुखपक्षाः सन्ति। चिकित्साविज्ञाने संज्ञानस्य महत्त्वं विशेषतया वर्तते, यतः चिकित्सासम्बद्धविविधकार्येषु रोगिणः, चिकित्सकाः तथा अन्ये स्वास्थ्यसेवाप्रदातारश्च संज्ञानात्मकप्रक्रियाणाम् उपयोगं कुर्वन्ति। रोगी स्वलक्षणानाम् अवबोधनाय, चिकित्सकीयपरामर्शस्य स्मरणाय, स्वास्थ्यसम्बद्धसूचनानां संप्रेषणाय तथा च उपचारप्रक्रियायां समुचितरूपेण सहभागितुं संज्ञानात्मकक्षमतानामुपयोगं करोति। चिकित्सकश्च रोगलक्षणानाम् अवलोकनाय, प्राप्तसूचनानां विश्लेषणाय, रोगावस्थायाः निर्धारणाय, करणज्ञानाय तथा च उपचारयोजनायाः निर्माणाय संज्ञानात्मकक्षमतानाम् उपयोगं करोति।

संज्ञानस्य चिकित्साविज्ञानेन सह सम्बन्धः चिकित्साविज्ञानस्य विविधक्षेत्रेषु विशेषतया परिलक्ष्यते। तेषु तन्त्रिकाविज्ञानम्, मनोचिकित्साविज्ञानम्, पुनर्वासचिकित्सा, नैदानिकचिकित्सा, चिकित्साशिक्षा तथा निवारकस्वास्थ्यसेवा प्रमुखक्षेत्राणि सन्ति। संज्ञानात्मकक्षमतासु जायमानपरिवर्तनानि व्यक्तेः संचारक्षमताम्, स्वावलम्बनम्, उपचारस्य सम्यगनुपालनं तथा जीवनगुणवत्तां प्रभावयितुं शक्नुवन्ति। संज्ञानात्मकप्रक्रियाणाम् अवबोधः चिकित्सकेभ्यः रोगिभिः सह प्रभाविसंवादं कर्तुम्, नैदानिकतर्कस्य प्रयोगं कर्तुम्, पुनर्वासकार्यं सम्पादयितुं तथा चिकित्सासम्बन्धिनः निर्णयान् ग्रहीतुञ्च सहायकः भवति। अस्मिन् लेखे संज्ञानस्य प्रमुखतत्त्वानां तथा चिकित्साविज्ञाने तेषां महत्त्वं विषये विशेषतया विवेचनं क्रियते। चिकित्साक्षेत्रे संज्ञानात्मकप्रक्रियाणां व्यावहारिकमहत्त्वं स्पष्टिकर्तुम् उपयुक्तोदाहरणानि प्रस्तुतानि सन्ति। विवेचनस्य आधारेण स्पष्टं भवति यत् संज्ञानं मस्तिष्कस्य, व्यवहारस्य, स्वास्थ्यस्य, रोगस्य तथा चिकित्साप्रक्रियायाः च मध्ये महत्त्वपूर्णं सम्बन्धसूत्रं बध्नाति। अतः चिकित्साविज्ञानस्य सम्यगवबोधाय संज्ञानस्याध्ययनं महत्त्वपूर्णमस्ति।

**❖ मुख्यशब्दाः – (Keywords)**

संज्ञानम्, चिकित्साविज्ञानम्, अवधानम्, स्मृतिः, प्रत्यक्षीकरणम्, कार्यकारीक्षमता, नैदानिकतर्कः, निर्णयः, तन्त्रिकाविज्ञानम्, स्वास्थ्यसेवा।

**❖ प्रस्तावना – (Introduction)**

स्वास्थ्यसंरक्षणम्, रोगनिवारणम्, रोगनिदानम्, रोगोपचारः तथा पुनर्वासः इति चिकित्साविज्ञानस्य प्रमुखोद्देश्यानि सन्ति। आधुनिकचिकित्साविज्ञाने शरीरस्य संरचनायाः, शारीरिकप्रक्रियाणाञ्च अध्ययनस्य महत्त्वं यथावत् अस्ति; तथापि मानवस्वास्थ्यसम्बन्धे मनोवैज्ञानिकपक्षस्य,

संज्ञानात्मकपक्षस्य च महत्त्वं स्वीकृतम् अस्ति। शारीरिकसंवेदनानाम् अवबोधः, रोगलक्षणानां विवेचनम्, सूचनानां स्मरणम्, संवादः, निर्णयकरणम् तथा व्यवहारनियमनम् इत्यादयः मानवीयक्रियाः संज्ञानात्मकप्रक्रियाभिः सम्बद्धाः सन्ति।

संज्ञानं नाम सा मानसिकप्रक्रियाणां समष्टिः, यया व्यक्तिः सूचनाः गृह्णाति, अवगच्छति, संसाधयति, धारयति, पुनःस्मरति तथा यथावश्यकं तासां प्रयोगञ्च करोति। चिकित्साक्षेत्रे संज्ञानस्य भूमिका विविधपक्षेषु दृश्यते। रोगी स्वलक्षणानाम् अवबोधनाय, चिकित्सकीयसूचनानां ग्रहणाय, चिकित्सकीयनिर्देशानां स्मरणाय तथा उपचारप्रक्रियायां सहभागितां प्रदर्शयितुं संज्ञानात्मकक्षमतानाम् उपयोगं करोति। चिकित्सकस्य कृते तु रोगलक्षणानाम् अवलोकनाय, चिकित्सासूचनानां विश्लेषणाय, सम्भावितरोगस्य निर्धारणाय, नैदानिकतर्कस्य प्रयोगाय तथा उचितचिकित्सानिर्णयस्य ग्रहणाय संज्ञानात्मकक्षमतायाः आवश्यकता वर्त्तते।

अतः संज्ञानस्याध्ययनेन मनोविज्ञानस्य, तन्त्रिकाविज्ञानस्य तथा चिकित्साविज्ञानस्य परस्परसम्बन्धं स्पष्टीक्रियते। संज्ञानात्मक-प्रक्रियाणां सम्यगवबोधेन चिकित्सायाः प्रभावकारिता, रोगिपरिचर्यायाः गुणवत्ता तथा स्वास्थ्यसेवायाः प्रभावशीलता च वर्धयितुं शक्यते।

### ❖ संज्ञानस्य अवधारणा (Concept of Cognition)

‘Cognition’ इति पदं लैटिनभाषायाः **‘cognoscere’** इति पदात् निष्पन्नम्, यस्यार्थः **‘ज्ञातुम्’** इति भवति। संज्ञानात्मकमनोविज्ञाने तथा संज्ञानविज्ञाने संज्ञानं नाम ताः मानसिकप्रक्रियाः, याभिः व्यक्तिः सूचनाः गृह्णाति, अवगच्छति, संसाधयति, धारयति, पुनःस्मरति तथा यथावश्यकं प्रयोगं करोति।

संज्ञानं केवलं मानसिकक्षमता नास्ति, अपि तु परस्परसम्बद्धानां विविधमानसिकप्रक्रियाणां समुच्चयः अस्ति। एषा प्रक्रिया मानवानां व्यवहारस्य, अधिगमस्य, चिन्तनस्य तथा परिस्थितीनाम् अनुकूलनस्य च विकासे सहायकः भवति। संज्ञानस्य प्रमुखतत्त्वानि निम्ने प्रस्तूयते—

- अवधानम् (Attention)
- प्रत्यक्षीकरणम् (Perception)
- स्मृतिः (Memory)
- अधिगमः (Learning)
- भाषा (Language)
- युक्तिचिन्तनम् (Reasoning)
- समस्यासमाधानम् (Problem-solving)
- निर्णयप्रक्रिया (Decision-making)
- कार्यकारीक्षमता (Executive Functions)
- संज्ञानात्मकनमनीयता (Cognitive Flexibility)

### ❖ प्रमुखसंज्ञानात्मकतत्त्वानि तेषां चिकित्साक्षेत्रे प्रासङ्गिकता च (Major Cognitive Elements and Their Medical Relevance)

### 1. अवधानम् (Attention) :-

अवधानं नाम सा संज्ञानात्मकप्रक्रिया अस्ति, यस्याः साहाय्येन व्यक्तिः प्रासङ्गिकसूचनासु ध्यानं केन्द्रीकरोति तथा अप्रासङ्गिकसूचनानां प्रभावं न्यूनीकरोति। चिकित्साविज्ञाने अवधानस्य विशेषमहत्त्वम् अस्ति, यतः निरीक्षणे, अधिगमे, सम्प्रेषणे, नैदानिकमूल्याङ्कने तथा उपचारव्यवस्थापने च अवधानम् आवश्यकं भवति।

संज्ञानदृष्ट्या अवधानस्य प्रमुखरूपाणि यथा दीर्घकालिकमवधानम्, चयनात्मकमवधानम्, विभक्तावधानम्, परिवर्तनशीलावधानञ्च। चयनात्मकावधानं प्रासङ्गिकसूचनासु ध्यानं केन्द्रयति, दीर्घकालि-कमवधानं दीर्घकालं यावत् एकाग्रतां धारयति, विभक्तावधानं च एकस्मिन् समये विविधकार्येषु ध्यानं नियोजयितुं सहाय्यं करोति।

**उदाहरणम्—** नैदानिकपरीक्षणे चिकित्सकः रोगिणां विशिष्टलक्षणेषु अवधानं दत्वा तेषां रोगेतिहासस्य प्रासङ्गिकसूचनानां विचारं करोति।

अतः अवधानं प्रभाविचिकित्सकीयकार्यस्य महत्त्वपूर्णं संज्ञानात्मक-माधारतत्त्वम् अस्ति।

### 2. प्रत्यक्षीकरणम् (Perception) :-

प्रत्यक्षीकरणं नाम सा संज्ञानात्मकप्रक्रिया अस्ति, यस्याः साहाय्येन व्यक्तिः इन्द्रियैः प्राप्तविषयाणां ग्रहणम्, अवबोधनं तथा अर्थनिर्धारणञ्च करोति। चिकित्साविज्ञाने प्रत्यक्षीकरणस्य विशेषं महत्त्वम् अस्ति, यतः रोगी स्वशरीरे अनुभूयमानानां संवेदनानाम् अवबोधं करोति, चिकित्सकोपि रोगलक्षणानां शारीरिकचिह्नानाञ्च निरीक्षणेन तेषाम् अवबोधं करोति। दृश्यम्, श्राव्यं तथा स्पर्शसम्बद्धं प्रत्यक्षीकरणं नैदानिकमूल्याङ्कने महत्त्वपूर्णं भवति।

**उदाहरणम्—** चिकित्सकः रोगिणां शारीरिकचिह्नानि निरीक्ष्य रोगलक्षणैः सह सम्बन्धं निर्धारयति।

अतः प्रत्यक्षीकरणं स्वास्थ्यसम्बद्धविषयाणां ग्रहणे, अवबोधने तथा मूल्याङ्कने च महत्त्वपूर्णं संज्ञानात्मकतत्त्वम् अस्ति।

### 3. स्मृतिः (Memory) :-

स्मृतिः नाम सा संज्ञानात्मकप्रक्रिया अस्ति, यस्याः साहाय्येन व्यक्तिः पूर्वानुभूतविषयान् तथा प्राप्तसूचनाः धारयति, पुनः स्मरति च। अधिगमे, चिकित्सायाम्, रोगिपरिचर्यायाञ्च स्मृतेः महत्त्वपूर्णं स्थानम् अस्ति। चिकित्सकाः चिकित्साज्ञानस्य स्मरणाय, चिकित्साप्रक्रिया-णाम् अनुसरणाय तथा रोगिसम्बद्धसूचनानां पुनःस्मरणाय स्मृतेः उपयोगं कुर्वन्ति। रोगिणः अपि चिकित्सकस्य निर्देशानां स्मरणाय तथा स्वास्थ्यसम्बद्धकार्याणां सम्यक् सम्पादनाय स्मृतेः उपयोगं कुर्वन्ति। स्मृतेः प्रमुखभेदाः अल्पकालिकस्मृतिः, कार्यस्मृतिः तथा दीर्घकालिकस्मृतिः इत्यादयः सन्ति।

**उदाहरणम्—** रोगी चिकित्सकेन उक्तं निर्दिष्टम् औषधसेवनसमयं स्मरति, चिकित्सकश्च रोगिणां पूर्ववृत्तान्तं स्मृत्वा तस्य स्वास्थ्यावस्थां मूल्याङ्कनं करोति।

अतः स्मृतिः चिकित्साक्षेत्रे महत्त्वपूर्णं संज्ञानात्मकतत्त्वम् अस्ति।

### 4. अधिगमः (Learning) :-

अधिगमः नाम सा संज्ञानात्मकप्रक्रिया अस्ति, यस्याः साहाय्येन व्यक्तिः नूतनज्ञानम्, कौशलं तथा व्यवहारम् अधिगच्छति। स्मृत्या सह अधिगमस्य घनिष्ठः सम्बन्धः अस्ति तथा चिकित्साशिक्षायां रोगिपरिचर्यायाञ्च महत्त्वपूर्णं स्थानम् आवहति।

चिकित्सकाः तथा अन्ये स्वास्थ्यसेवाप्रदातारः नूतनं चिकित्सा-ज्ञानम्, चिकित्साविधीन्, प्रौद्योगिकीम् तथा उपचारपद्धतीः

निरन्तरम् अधिगच्छन्ति। रोगिणः अपि स्वास्थ्यरक्षणाय, चिकित्सकीयनिर्देशानां पालनाय तथा स्वास्थ्यक्षेत्रे आवश्यकपरिवर्तनानाम् अनुसरणाय नूतनानविषयान् अधिगच्छन्ति।

**उदाहरणम्—** चिकित्सकः नूतनोपचारपद्धतिम् अधिगत्य तस्याः प्रयोगं रोगिचिकित्सायां करोति। रोगी चिकित्सकेन निर्देशितं वाक्यमनुसरति।

अतः अधिगमः चिकित्साशिक्षायां तथा स्वास्थ्यशिक्षायां महत्त्वपूर्णं संज्ञानात्मकतत्त्वम् अस्ति।

### 5. भाषा (Language) :-

भाषा नाम सा संज्ञानात्मकशक्तिः अस्ति, यस्याः माध्यमेन व्यक्तिः स्वविचारान्, अनुभवान्, सूचनाः तथा आवश्यकताः अन्येभ्यः निवेदयति। चिकित्साक्षेत्रे रोगिणां चिकित्सकस्य च मध्ये सूचनानां सम्यक् सम्प्रेषणाय भाषायाः विशेषं महत्त्वम् अस्ति। रोगी भाषया स्वलक्षणानि तथा कष्टं चिकित्सकाय निवेदयति, चिकित्सकश्च रोगावस्थाम् अवगम्य आवश्यकान् चिकित्सानिर्देशान् प्रददाति।

**उदाहरणम्—** रोगी स्वलक्षणानि चिकित्सकाय कथयति, चिकित्सकश्च तानि श्रुत्वा उपचारं प्रददाति।

अतः भाषा चिकित्साक्षेत्रे प्रभाविसम्प्रेषणस्य महत्त्वपूर्णं संज्ञानात्मकतत्त्वम् अस्ति।

### 6. युक्तिचिन्तनम् (Reasoning) :-

युक्तिचिन्तनं नाम सा संज्ञानात्मकप्रक्रिया अस्ति, यस्याः साहाय्येन व्यक्तिः प्राप्तसूचनानां विश्लेषणं कृत्वा निष्कर्षं प्राप्नोति। चिकित्साविज्ञाने युक्तिचिन्तनस्य विशेषं महत्त्वम् अस्ति, यतः चिकित्सकः रोगलक्षणानि, रोगेतिहासं तथा परीक्षणपरिणामान् विचार्य रोगावस्थां निर्धारयति।

**उदाहरणम्—** चिकित्सकः रोगिणां लक्षणानि परीक्षणपरिणामाञ्च विचार्य सम्भावितरोगस्य निदानं करोति।

अतः युक्तिचिन्तनं रोगनिदानस्य तथा चिकित्सकीयनिर्णयस्य महत्त्वपूर्णं संज्ञानात्मकतत्त्वम् अस्ति।

### 7. समस्यासमाधानम् (Problem-Solving) :-

समस्यासमाधानं नाम सा संज्ञानात्मकप्रक्रिया अस्ति, यस्याः साहाय्येन व्यक्तिः समस्याम् अवगम्य, तस्याः कारणानि विचारयति, सम्भावितोपायान् अन्विष्य तेषु उचितम् उपायं चिनोति। चिकित्साविज्ञाने समस्यासमाधानस्य विशेषं महत्त्वम् अस्ति, यतः चिकित्सकेन विविधजटिलचिकित्सकीयसमस्यानां समाधानं करोति। चिकित्सकः रोगलक्षणानि, रोगेतिहासं तथा परीक्षणपरिणामान् विचार्य समस्यायाः कारणं निर्धारयति तथा तदनुसारम् उचितं उपचारं निश्चितं करोति।

**उदाहरणम्—** रोगिणः स्वास्थ्ये अपेक्षितः सुधारः न भवति चेत् चिकित्सकः तस्य कारणं विचार्य उपचारपद्धतौ आवश्यकं परिवर्तनं करोति।

अतः समस्यासमाधानं चिकित्सायाम् उचितनिर्णयग्रहणाय महत्त्वपूर्णसंज्ञानात्मकतत्त्वम् अस्ति।

### 8. कार्यकारीक्षमता (Executive Functions) :-

कार्यकारीक्षमता नाम ताः उच्चस्तरीयसंज्ञानात्मकप्रक्रियाः सन्ति, याभिः व्यक्तिः कार्याणां योजनां करोति, अस्याः प्रमुखपक्षेषु योजना, व्यवस्थापनम्, नियन्त्रणम्, निरीक्षणं तथा संज्ञानात्मकनमनीयता अन्तर्भवन्ति। चिकित्साक्षेत्रे कार्यकारीक्षमता रोगिणां चिकित्सकीय-कार्याणि व्यवस्थितरूपेण सम्पादयितुं तथा चिकित्सकस्य परिवर्तितपरिस्थितौ उचितनिर्णयं स्वीकर्तुं सहाय्यं करोति।

**उदाहरणम्—** रोगिणां स्वास्थ्यावस्थायां परिवर्तनं न भवति चेत् चिकित्सकः उपचारयोजनां पुनर्विचार्य उचितम् उपचारं निर्धारयति।

अतः कार्यकारीक्षमता चिकित्साक्षेत्रे महत्त्वपूर्णं संज्ञानात्मकतत्त्वम् अस्ति।

### 9. निर्णयप्रक्रिया (Decision-Making) :-

निर्णयप्रक्रिया नाम सा संज्ञानात्मकक्रमः अस्ति, यस्य साहाय्येन व्यक्तिः उपलब्धनामेषु विविधविकल्पेषु उचितविकल्पं चिनोति। चिकित्साक्षेत्रे निर्णयप्रक्रियायाः विशेषं महत्त्वम् अस्ति, यतः चिकित्सकः रोगनिदानाय, परीक्षणाय तथा उपचाराय उचितं निर्णयं स्वीकरोति। प्रभाविनिर्णयाय सम्यक् सूचना, अवधानम्, युक्तिचिन्तनं तथा सम्भावितपरिणामानां विचारः आवश्यकोऽस्ति। नूतनसूचनायाः प्राप्तौ पूर्वनिर्णयस्य परिवर्तनाय संज्ञानात्मकनमनीयता अपि अपेक्षिता भवति।

**उदाहरणम्—** रोगिणाम् अवस्थासु परिवर्तनं भवति चेत् चिकित्सकः नूतनसूचनानुसारम् उपचारयोजनां परिवर्तयति।

अतः निर्णयप्रक्रिया संज्ञानात्मकप्रक्रियाणां चिकित्सकीयकार्येण सह सम्बन्धं स्थापयति।

### 10. संज्ञानात्मकनमनीयता (Cognitive Flexibility) :-

संज्ञानात्मकनमनीयता नाम सा संज्ञानात्मकक्षमता अस्ति, यस्याः साहाय्येन व्यक्तिः परिस्थितिपरिवर्तने स्वस्य चिन्तनं तथा व्यवहारं परिवर्तयति। अस्याः साहाय्येन व्यक्तिः वैकल्पिकोपायान् विचारयति तथा नूतनपरिस्थित्यानुसारं कार्यपद्धतिं समायोजयति। चिकित्साक्षेत्रे नूतनचिकित्सासूचनानां प्राप्तौ चिकित्सकः पूर्वनिर्धारितनिदान-पद्धतिम्, उपचारयोजनाञ्च परिवर्तयितुं शक्नोति। रोगी अपि स्वास्थ्यावस्थायां तथा उपचारपद्धतौ जायमानानपरिवर्तनानाम् अनुकूलनं करोति।

**उदाहरणम्—** नूतनलक्षणानि दृश्यन्ते चेत् चिकित्सकः उपचार-योजनां पुनः विचार्य तदनुसारं परिवर्तयति।

अतः संज्ञानात्मकनमनीयता परिवर्तितपरिस्थितिषु उचितचिन्तनाय महत्त्वपूर्णसंज्ञानात्मकक्षमता अस्ति।

### ❖ संज्ञानं रोगनिदानञ्च (Cognition and Clinical Diagnosis)

रोगनिदानप्रक्रियायां रोगिणः स्वास्थ्यावस्थासम्बन्धिसूचनानां सङ्ग्रहः, व्यवस्थापनम्, विश्लेषणम्, व्याख्या च कुर्वन्ति। प्रयोगशालापरीक्षणैः तथा आधुनिकचिकित्साप्रौद्योगिक्या प्राप्त-तथ्यानि रोगनिदाने सहायकानि भवन्ति, किन्तु तेषां सम्यग् अवबोधाय संज्ञानात्मकप्रक्रियाणाम् आवश्यकता भवति।

**रोगनिदानस्य प्रमुखचरणानि**

- ➢ सूचनानां सङ्ग्रहः।
- ➢ प्रासङ्गिकलक्षणानाम् अभिज्ञानम्।
- ➢ लक्षणानां स्वरूपस्य अवबोधः।
- ➢ सम्भावितकारणानां विचारः।
- ➢ विविधविकल्पानां तुलना।
- ➢ प्रमाणानां मूल्याङ्कनम्।
- ➢ उचितनिष्कर्षस्य निर्धारणम्।

एतेषु कार्येषु अवधानम्, प्रत्यक्षीकरणम्, स्मृतिः, युक्तिचिन्तनम्, समस्यासमाधानं तथा निर्णयप्रक्रिया इत्येतासां संज्ञानात्मकक्षमतानां महत्त्वपूर्णभूमिका अस्ति।

**❖ संज्ञानं निर्णयप्रक्रिया च (Cognition and Medical Decision-Making)**

निर्णयप्रक्रियायां संज्ञानस्य महत्त्वपूर्णभूमिका अस्ति। व्यक्तिः सूचनानां संग्रहणम्, तासाम् अवबोधम्, विकल्पानां विचारम्, सम्भावितपरिणामानां मूल्याङ्कनं तथा उचितं निर्णयञ्च स्वीकरोति। चिकित्साक्षेत्रे रोगनिदानम्, उपचारनिर्धारणं तथा औषधप्रयोगञ्च इत्यादिषु संज्ञानात्मकप्रक्रिया निर्णयप्रक्रियायां सहायकः भवति। अत्र अवधानम्, स्मृतिः, युक्तिचिन्तनम्, कार्यकारीक्षमता तथा संज्ञानात्मकनमनीयता इत्येतानि संज्ञानात्मकतत्त्वानि सक्रियतया कार्यं कुर्वन्ति।

अतः संज्ञानं चिकित्सकीयनिर्णयप्रक्रियायाः प्रमुखम् आधारतत्त्वम् अस्ति।

**❖ संज्ञानं तन्त्रिकाविकाराश्च (Cognition and Neurological Disorders)**

तन्त्रिकाविज्ञाने संज्ञानस्य चिकित्साविज्ञानस्य च सम्बन्धः विशेषतया दृश्यते। संज्ञानात्मकप्रक्रियाः मस्तिष्कस्य जटिलकार्यप्रणालीभिः सम्बद्धाः सन्ति। संज्ञानात्मकक्षमतानां पुनर्विकासेन तन्त्रिकाविकार-ग्रस्तानां व्यक्तीनां संज्ञानात्मकक्षमतासु परिवर्तनं कर्तुं तथा दैनन्दिनकार्येषु स्वावलम्बनं वर्धयितुं शक्यते।

अतः तन्त्रिकास्वास्थ्यस्य तथा संज्ञानात्मकक्षमतानां पुनर्विकासस्य सम्यगवबोधाय संज्ञानस्य महत्त्वपूर्णं स्थानम् अस्ति।

**❖ संज्ञानं मानसिकस्वास्थ्यञ्च (Cognition and Mental Health)**

मानसिकस्वास्थ्ये संज्ञानस्य महत्त्वपूर्णं स्थानम् अस्ति। अवधानम्, स्मृतिः, प्रत्यक्षीकरणम्, युक्तिचिन्तनं तथा कार्यकारीक्षमता इत्यादीनि संज्ञानात्मकतत्त्वानि व्यक्तेः अनुभवेषु प्रतिक्रियायां तथा दैनन्दिनकार्यसम्पादने प्रभावं जनयन्ति। संज्ञानात्मकमूल्याङ्कनेन व्यक्तेः संज्ञानात्मककार्यप्रणाल्याः सम्यगवबोधः भवति तथा च मानसिकस्वास्थ्यस्य मूल्याङ्कने चिकित्सकेभ्यः सहायतां प्राप्यते। अतः संज्ञानं मानसिकस्वास्थ्येन, भावनाभिः तथा व्यवहारेण च परस्परसम्बद्धम् अस्ति।

**❖ संज्ञानं रोगिपरिचर्या च (Cognition and Patient Care)**

रोगिपरिचर्यायां केवलं शारीरिकलक्षणानां चिकित्सा पर्याप्तं नास्ति। सम्प्रेषणम्, अवबोधः, सहयोगः तथा सहभागिता अपि आवश्यक-मस्ति। रोगिणां संज्ञानात्मकक्षमताः निम्नलिखितकार्येषु सहायकाः भवन्ति—

- चिकित्सासम्बद्धसूचनानाम् अवबोधः।
- स्वलक्षणानां निवेदनम्।
- चिकित्सानिर्देशानां स्मरणम्।
- स्वास्थ्यसम्बद्धकार्याणां व्यवस्थापनम्।
- चिकित्सानिर्णयेषु सहभागिता।
- उपचारोत्तरकार्यक्रमस्य अनुसरणम्।

अतः चिकित्सकेन रोगिणां संज्ञानात्मकक्षमताम् अनुसृत्य सरलतया, स्पष्टतया तथा आवश्यकतानुसारं पुनः चिकित्सासम्बद्धसूचनाः प्रदातव्याः। एतेन रोगिणाम् अवबोधः तथा चिकित्सासहभागिता वर्धते। अतः संज्ञानस्य विचारः रोगिकेन्द्रितचिकित्सायाः प्रभावं वर्धयितुं सहायकः भवति।

**❖ संज्ञानम् उपचारानुपालनञ्च (Cognition and Treatment Adherence)**

उपचारानुपालने संज्ञानात्मकक्षमतानां महत्त्वपूर्णभूमिका अस्ति। रोगिणां चिकित्सासम्बद्धसूचनानाम् अवबोधः, स्मरणम्, व्यवस्थापनम् तथा प्रयोगः आवश्यकः भवति। जटिलोपचार-योजनायाम् अवधानम्, स्मृतिः, योजनाकरणं तथा आत्मनियन्त्रणम् अपि अपेक्षन्ते। चिकित्सकैः रोगिभ्यः सरलाः, स्पष्टाः तथा सुबोधाः निर्देशाः दातव्याः। एतेन रोगी उपचारयोजनां सम्यक् अवगम्य तस्याः अनुसरणं कर्तुं समर्थः भवति। अतः संज्ञानम् उपचारस्य सम्यगनुपालने तथा दीर्घकालिकस्वास्थ्यव्यवस्थापने च महत्त्वपूर्णम् अस्ति।

**❖ संज्ञानं चिकित्साशिक्षा च (Cognition and Medical Education)**

चिकित्साशिक्षायां विद्यार्थिभिः विस्तृतं चिकित्साज्ञानम् अधिगन्तव्यं तथा तत् चिकित्सकीयपरिस्थितिषु यथायोग्यं प्रयोक्तुं सामर्थ्यं प्राप्तव्यम्। अतः अवधानम्, स्मृतिः, युक्तिचिन्तनम्, समस्यासमाधानं तथा आलोचनात्मकचिन्तनं चिकित्साशिक्षायाः महत्त्वपूर्णसंज्ञानात्मकतत्त्वानि सन्ति। संज्ञानविज्ञानस्य सिद्धान्ताः चिकित्साज्ञानस्य अधिगमे, व्यवस्थापने, धारणे तथा पुनःस्मरणे सहायकाः भवन्ति। सक्रियाधिगमः, सूचनानां सुव्यवस्थितप्रस्तुतिः, अभ्यासः तथा पुनःस्मरणाभ्यासः प्रभाविनोऽधिगमं समर्थयन्ति। अतः चिकित्साशिक्षायाः विकासाय संज्ञानात्मकतत्त्वानां महत्त्वपूर्णं योगदानं वर्तते।

**❖ संज्ञानं रोगप्रतिषेधचिकित्सा च (Cognition and Preventive Medicine)**

रोगप्रतिषेधचिकित्सायाः उद्देश्यं रोगसम्भावनानां न्यूनीकरणं तथा स्वास्थ्यसंरक्षणम् अस्ति। संज्ञानात्मकप्रक्रियाः स्वास्थ्यसम्बद्ध-सूचनानाम् अवबोधे, स्मरणे तथा स्वास्थ्यसम्बद्धनिर्णयेषु महत्त्वपूर्णाभूमिकां निर्वहन्ति। अतः स्वास्थ्यशिक्षायाम् अवधानम्, अवबोधः, स्मृतिः तथा निर्णयप्रक्रिया इत्येतेषां संज्ञानात्मकतत्त्वानां महत्त्वपूर्णं स्थानम् अस्ति।

**❖ संज्ञानविज्ञानं भावीचिकित्साविज्ञानञ्च (Cognitive Science and the Future of Medical Science)**

संज्ञानविज्ञानस्य चिकित्साविज्ञानेन सह सम्बन्धः अन्तर्विषय-कानुसन्धानाय नूतनावसरान् प्रददाति। संज्ञानविज्ञानं मनोविज्ञानम्, तन्त्रिकाविज्ञानम्, भाषाविज्ञानं तथा दर्शनशास्त्रञ्च समन्वयेन मानवीयमानसिक-प्रक्रियाणाम् अध्ययनं करोति।

चिकित्साविज्ञाने संज्ञानविज्ञानस्य उपयोगः निम्नलिखितक्षेत्रेषु भवति—

- संज्ञानात्मकमूल्याङ्कनम्।
- चिकित्सकीयनिर्णयप्रक्रिया।
- संज्ञानात्मकक्षमतानां पुनर्विकासः।
- रोगिसम्प्रेषणम्।
- चिकित्साशिक्षा।
- रोगप्रतिषेधचिकित्सा।

भविष्ये संज्ञानस्य, मस्तिष्कस्वास्थ्यस्य, व्यवहारस्य तथा शारीरिकस्वास्थ्यस्य परस्परम् अध्ययनं चिकित्सानुसन्धाने अधिकं महत्त्वपूर्णं भवितुम् अर्हति। अतः संज्ञानविज्ञानस्य चिकित्साविज्ञानेन सह समन्वयः मानवस्वास्थ्यस्य समग्रावबोधाय महत्त्वपूर्णोऽस्ति।

### ❖ संज्ञानात्मकतत्त्वानां चिकित्सकीयतत्त्वैः सह तुलनात्मकसम्बन्धः

अधोलिखितसारण्यां प्रमुखसंज्ञानात्मकतत्त्वानां चिकित्साविज्ञान-सम्बद्धकार्यैः सह सम्बन्धः तथा तेषां महत्त्वं प्रदर्श्यते—

| क्र.सं | संज्ञानात्मकतत्त्वम् | चिकित्सकीयतत्त्वम् | सम्बन्धः तथा महत्त्वम् |
|---|---|---|---|
| 1 | अवधानम् | नैदानिकनिरीक्षणम् | प्रासङ्गिकलक्षणेषु तथा शारीरिकचिह्नेषु ध्यानं केन्द्रितुं सहायकं भवति। |
| 2 | प्रत्यक्षीकरणम् | लक्षणपरिज्ञानम् | शारीरिकलक्षणानां तथा नैदानिकचिह्नानां ग्रहणे तेषाम् अवबोधे च सहायकम भवति। |
| 3 | स्मृतिः | रोगेतिहासः तथा उपचारः | रोगिणां पूर्ववृत्तान्तस्य, चिकित्साज्ञानस्य तथा चिकित्सानिर्देशानां स्मरणे अपेक्षते। |
| 4 | अधिगमः | चिकित्साशिक्षा | चिकित्साज्ञानस्य, चिकित्साविधीनां तथा चिकित्सकीयकौशलस्य अधिगमे सहायकोऽस्ति। |
| 5 | भाषा | रोगिसम्प्रेषणम् | रोगिणः चिकित्सकस्य च मध्ये स्पष्टं सम्प्रेषणं साधयति। |
| 6 | युक्तिचिन्तनम् | रोगनिदानम् | रोगलक्षणानां तथा परीक्षणपरिणामानां विश्लेषणेन रोगनिर्धारणे सहायकमस्ति। |
| 7 | समस्यासमाधानम् | उपचारयोजना | चिकित्सकीयसमस्यानां समाधानाय उचितोपायस्य निर्धारणे सहायकं भवति। |
| 8 | निर्णयप्रक्रिया | चिकित्सकीयनिर्णयः | निदानस्य तथा उपचारस्य उचितविकल्पस्य चयनाय प्रेरयति। |
| 9 | कार्यकारीक्षमता | रोगिप्रबन्धनम् | चिकित्सासम्बद्धकार्याणां योजनायां, व्यवस्थापने, निरीक्षणे तथा सम्पादने सहायकमस्ति। |
| 10 | संज्ञानात्मकनमनीयता | उपचारपरिवर्तनम् | रोगिणां स्वास्थ्यावस्थायां परिवर्तनानुसारम् उपचारयोजनां परिवर्तयितुं सहायकं भवति। |

### निष्कर्षः (Conclusion)

संज्ञानं चिकित्साविज्ञानस्य महत्त्वपूर्णं तत्त्वम् अस्ति, यतः अवधानम्, स्मृतिः, अधिगमः, युक्तिचिन्तनम्, समस्यासमाधानं तथा निर्णयप्रक्रिया इत्यादीनां संज्ञानात्मकप्रक्रियाणां चिकित्सायां महत्त्व-पूर्णभूमिका अस्ति। संज्ञानात्मकक्षमताः रोगिणां रोगलक्षणानाम् अवबोधे, चिकित्सासूचनानां ग्रहणे, उपचारनिर्देशानां पालने तथा उपचारप्रक्रियायां सहभागितायां च साहाय्यं कुर्वन्ति। चिकित्सकानां कृते संज्ञानात्मकक्षमताः रोगनिदाने, निर्णयकरणे, सूचनासम्प्रेषणे तथा उपचारयोजनायाञ्च महत्त्वपूर्णभूमिकां निर्वहन्ति। अतः संज्ञानं मस्तिष्कस्य, व्यवहारस्य, स्वास्थ्यस्य तथा चिकित्सायाः मध्ये महत्त्वपूर्णं सम्बन्धसूत्रम् अस्ति। संज्ञानविज्ञानस्य चिकित्साविज्ञानेन सह समन्वयः मानवस्वास्थ्यस्य समग्रावबोधाय सहायकः भवति इति निश्चप्रचम्।

### सन्दर्भग्रन्थाः References


1. Agniveśa, Caraka, & Dṛḍhabala. (2014). Caraka Saṃhitā of Agniveśa (R. K. Sharma & B. Dash, Trans.). Chowkhamba Sanskrit Series Office.
2. Suśruta. (2010). Suśruta Saṃhitā (K. R. Srikantha Murthy, Trans.). Chaukhambha Orientalia.
3. Vāgbhaṭa. (2012). Aṣṭāṅgahṛdayam of Vāgbhaṭa (K. R. Srikantha Murthy, Trans.). Chaukhambha Krishnadas Academy.
4. Patañjali. (1914). The Yoga-system of Patañjali: Or, the ancient Hindu doctrine of concentration of mind (J. H. Woods, Trans.). Harvard University Press.
5. Cook, R., Waldrop-Valverde, D., Sharma, A., Vamos, S., Mahajan, B., Weiss, S. M., Kumar, M., Nehra, R., & Jones, D. L. (2014). Cognitive functioning, depression, and HIV medication adherence in India: A randomized pilot trial. Health Psychology and Behavioral Medicine, 2(1), 640–652.
6. Porrselvi, A. P., & Shankar, V. (2017). Status of cognitive testing of adults in India. Annals of Indian Academy of Neurology, 20(4), 334–340.
7. Settem, V. V. J., Karanadi, H., & Praharaj, S. K. (2019). Cognitive deficits, depressive symptoms, insight, and medication adherence in remitted patients with schizophrenia. Indian Journal of Psychiatry, 61(4), 335–341.
8. Kumar, D. V., Rajprasath, R., Priyadharshini, N. A., Murugan, M., & Devi, R. (2020). Infusing the axioms of clinical reasoning while designing clinical anatomy case vignettes teaching for novice medical students: A randomised cross-over study. Anatomy & Cell Biology, 53(2), 151–161.
9. Japang, I., Rathi, R. B., Verma, J., & Dwivedi, P. (2022). A literary review on Buddhi (IQ) and Smriti (Memory)—An Ayurveda approach. International Journal of Ayurvedic Medicine, 13(3), 667–672.
10. Devassy, S. M., John, S. B., & Scaria, L. (2023). Cognitive factors associated with hypertension and diabetes control among diagnosed and treated patients: Findings from a community cohort in India. Preventive Medicine Reports, 36, 102495.
11. Mukhopadhyay, D. K., & Choudhari, S. G. (2024). Clinical reasoning skills among second-phase medical students in West Bengal, India: An exploratory study. Cureus, 16(9), e68839.
12. Posner, M. I., & Petersen, S. E. (1990). The attention system of the human brain. Annual Review of Neuroscience, 13, 25–42.
13. Elstein, A. S., & Schwarz, A. (2002). Clinical problem solving and diagnostic decision making: Selective review of the cognitive literature. BMJ, 324(7339), 729–732.
14. Croskerry, P. (2009). Clinical cognition and diagnostic error: Applications of a dual process model of reasoning. Advances in Health Sciences Education, 14(Suppl. 1), 27–35.
15. Dunphy, B. C., Cantwell, R., Bourke, S., Fleming, M., Smith, B., Joseph, K. S., & Dunphy, S. L. (2010). Cognitive elements in clinical decision-making: Toward a cognitive model for medical education and understanding clinical reasoning. Advances in Health Sciences Education, 15, 229–250.
16. Norman, G. R., & Eva, K. W. (2010). Diagnostic error and clinical reasoning. Medical Education, 44(1), 94–100.
17. Baddeley, A. (2012). Working memory: Theories, models, and controversies. Annual Review of Psychology, 63, 1–29.
18. Diamond, A. (2013). Executive functions. Annual Review of Psychology, 64, 135–168.